# shrI subrahmaNya dhyAnam

# શ્રીસુબ્રહ્મણ્ય ધ્યાનમ્

## Document Information

Text title : shrii subrahmaNyadhyaanam

File name : subradhyanam.itx

Category : subrahmanya, stotra

Location : doc_subrahmanya

Transliterated by : Antaratma antaratma at Safe-mail.net

Proofread by : Antaratma antaratma at Safe-mail.net

Latest update : March 15, 2006

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 17, 2023

*sanskritdocuments.org*

shrI subrahmaNya dhyAnam

# શ્રીસુબ્રહ્મણ્ય ધ્યાનમ્

ષડાનનં કુઙ્કુમરક્તવર્ણં
મહામતિં દિવ્યમયૂરવાહનં
રુદ્રસ્યસૂનું સુરસૈન્યનાથં
ગુહં સદા શરણમહં પ્રપદ્યે ॥ ૧॥

કનકકુણ્ડલમણ્ડિતષણ્મુખં
કનકરાજિવિરાજિતલોચનં
નિશિતશસ્ત્રશરાસનધારિણં
શરવણોત્ભવમીશસુતં ભજે ॥ ૨॥

સિન્દૂરારુણમિન્દુકાન્તિવદનં
કેયૂરહારાદિભિઃ
દિવ્યૈરાભરણૈર્વિભૂષિતતનું
સ્વર્ગસ્યસૌખ્યપ્રદં
અમ્ભોજાભયશક્તિ કુક્કુટધરં
રક્તાઙ્ગરાગાંશુકં
સુબ્રહ્મણ્યમુપાસ્મહે પ્રણમતાં
સર્વાર્થસંસિદ્ધિદમ્ ॥ ૩॥

વન્દે શક્તિધરં શિવાત્મતનયં
વન્દે પુળિન્દાપતિં
વન્દે ભાનુસહસ્રમદ્ભુદનિભં
વન્દે મયૂરાસનં
વન્દે કુક્કુટકેતનં સુરવરં
વન્દે કૃપામ્ભોનિધિં
વન્દે કલ્પકપુષ્પશૈલનિલયં
વન્દે ગુહં ષણ્મુખમ્ ॥ ૪॥

દ્વિષડ્ભુજં ષણ્મુખમમ્બિકાસુતં
    કુમારમાદિત્યસમાનતેજસં
વન્દે મયૂરાસનમગ્નિસમ્ભવં
    સેનાન્યમદ્યાહમભીષ્ટસિદ્ધયે ॥ ૫॥

ધ્યાયેત્ ષણ્મુખમિન્દુ કોટિસદૃશં
    રત્નપ્રભાશોભિતં
બાલાર્કદ્યુતિ ષટ્કિરીટવિલસત્-
    કેયૂરહારાન્વિતં
કર્ણાલંકૃત કુણ્ડલપ્રવિલસત્
    કણ્ઠસ્થલૈઃ શોભિતં
કાઞ્ચી કઙ્કણ કિઙ્કિણીરવયુતં
    શ‍ૃઙ્ગાર સારોદયમ્ ॥ ૬॥

ધ્યાયેદીપ્સિતસિદ્ધિતં શિવસુતં
    શ્રીદ્વાદશાક્ષં ગુહં
બાણઙ્ખેટકમઙ્કુશઞ્ચવરદં
    પાશં ધનુઃશક્રકં
વજ્રંશક્તિમસિન્ત્રિશૂલમભયં
    દોર્ભિર્ધૃતં ષણ્મુખં
ભાસ્વચ્છત્રમયૂરવાહસુભગં
    ચિત્રામ્બરાલંકૃતમ્ ॥ ૭॥

ગાઙ્ગેયં વહ્નિગર્ભં શરવણજનિતં
    જ્ઞાનશક્તિં કુમારં
સુબ્રહ્મણ્યં સુરેશં ગુહમચલદિદં
    રુદ્રતેજસ્વરૂપં
સેનાન્યં તારકઘ્નં ગજમુખસહજં
    કાર્તિકેયં ષડાસ્યં
સુબ્રહ્મણ્યં મયૂરધ્વજરથસહિતં
    દેવદેવં નમામિ ॥ ૮॥

ષણ્મુખં દ્વાદશભુજં દ્વાદશાક્ષં શિખિધ્વજમ્ ।
શક્તિદ્વયસમાયુક્તં વામદક્ષિણપાર્શ્વયોઃ ॥ ૯॥

શક્તિંશૂલં તથા ખડ્ગં ખેટઞ્ચાપંશરં તથા ।
ઘણ્ટાં ચ કુક્કુટઞ્ચૈવપાશઞ્ચૈવતથાઙ્કુશમ્ ॥ ૧૦॥

અભયં વરદઞ્ચૈવ ધારયાન્તં કરામ્બુજૈઃ ।
મહાબલં મહાવીર્યં શિખિવાહં શિખિપ્રભમ્ ॥ ૧૧॥

કિરીટકુણ્ડલોપેતં ખણ્ડિતોદ્દણ્ડતારકમ્ ।
મણ્ડલીકૃતકોદણ્ડં કાણ્ડૈઃક્રૌઞ્ચધરાધરમ્ ॥ ૧૨॥

દારયન્તં દુરાધર્ષં દૈત્યદાનવરાક્ષસૈઃ ।
દેવસેનાપતિં દેવકાર્યૈકનિરતં પ્રભુમ્ ॥ ૧૩॥

મહાદેવતનૂજાતં મદનાયુતસુન્દરમ્ ।
ચિન્તયે હૃદયામ્ભોજે કુમારમમિતેજસમ્ ॥ ૧૪॥

॥ ઇતિ શ્રી સુબ્રહ્મણ્યધ્યાનં સમાપ્તમ્ ॥

---

Encoded and proofread by antaratma at Safe-mail.net

---

*shrI subrahmaNya dhyAnam*

pdf was typeset on September 17, 2023

Please send corrections to *sanskrit@cheerful.com*